


*Research Article*

# वेदेषु ज्योतिषशास्त्रस्य स्फुटसिद्धान्तः

**डॉ ज्योत्स्ना द्विवेदी**

सहायक प्रध्यापक, संस्कृत,उच्च शिक्षा उत्कृष्टता संस्थान, शासकीय ठाकुर रणमत सिंह महाविद्यालय रीवा ,मध्यप्रदेश, भारत

**Corresponding Author:** *डॉ ज्योत्स्ना द्विवेदी

**DOI:** https://doi.org/10.5281/zenodo.18213482

**सारांश**

वेदाङ्गेषु ज्योतिषशास्त्रे विशेषः स्थानः लभ्यते, यत् वेदानां चक्षु इति कथ्यते। एषः शास्त्रः कालगणना, ग्रह-नक्षत्रगतिः, युग, संवत्सर, ऋतु, ग्रहणादीनि विषयानां वैज्ञानिकं विवेचनं करोति। एषा लेखे ऋग्वेदस्य, यजुर्वेदस्य च ब्राह्मणग्रन्थानां संदर्भैः वैदिककाले ज्योतिषशास्त्रस्य सिद्धान्तात्मकं रूपं स्पष्टं कृतम्। तथा च प्राग्वैदिके वैदिके च परम्परायां तस्य विकासः, प्रयोजनम्, शास्त्रीयमहत्त्वञ्च विश्लेषितम्, यत् ज्योतिषशास्त्रं भारतीयज्ञानपरम्परायाः दृढः वैज्ञानिकः आधारः इति सिद्धं भवति।

**Manuscript Information**

- **ISSN No:** 2583-7397
- **Received:** 15-11-2025
- **Accepted:** 23-12-2025
- **Published:** 11-01-2026
- **IJCRM:**5(1); 2026: 41-44
- **©2026, All Rights Reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

**How to Cite this Article**

डॉ.ज्योत्स्ना द्विवेदी. वेदेषु ज्योतिषशास्त्रस्य स्फुटसिद्धान्तः. Int J Contemp Res Multidiscip. 2026;5(1):41-44.

**Access this Article Online**

www.multiarticlesjournal.com

**बीजशब्दाः** वेदाङ्ग, ज्योतिषशास्त्र, वैदिक ज्योतिष, ग्रह-नक्षत्र, कालगणना, युग, संवत्सर, खगोलविद्या


© 2026 डॉ ज्योत्स्ना द्विवेदी. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

**उपोद्घातः**

संस्कृतवाड्.मयं हि विश्ववांग्मय समुदाये मूर्द्धन्यमिति न संभवति, कस्यापि विमतिः।अस्य हि विस्ततृतं सुसमृद्धंच सर्वांगपूर्णं कलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः। अत्रत्यो हि शाश्वतश्च सार्वभौमश्च ज्ञाननिधिरनादिकालात् आरभ्यसाम्प्रतिकयुगपर्यन्तमपि अनवरतरूपेण उपचीयमानो दृश्यते।वांग्मयमिदमादाय उक्ति वर्त्तते 'यन्नेहास्ति न च अन्यत्र यदि इहास्ति न तत् क्वचित्'इति।अविद्यया मृत्युं तीर्त्वा विद्यया अमृतमश्नुते।इति प्रभृति उपदेशवचनानि लभेयन्ते अत्रैव।अनेन सिद्ध्यति यदस्यवांग्मयस्यमूलतो द्वौभागौ-अविद्या विद्या चेति।अविद्याअपराइत्युच्यते,विज्ञानशब्देनअपिज्ञायतेयदाविद्या परा शब्देन ज्ञायते। वेदस्य हिषट्स्वंगेषु ज्योतिषमिति।ज्योतिषं हि वेदस्य चक्षुत्वेन स्मर्यते। यथा हि तस्य- छन्द;पादौ तु वेदस्य ,मुखं व्याकरणं स्मृतम्। ज्योतिषमयनं चक्षु; निरुक्तंश्रोत्रमुच्यते।शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।तस्मात् सांगमधीत्यैव ब्रह्मलोके महीयते। यथोक्तं

**भास्कराचार्यः-**

वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाड्गमध्येऽस्य तेनोच्यते। संयुतोऽपीतरैः
कर्णनासादिभिः चक्षुषाड्गेन हीनो न किंचित्करः। इति।

अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्ट्या ज्योतिः शब्दनोच्यन्ते। तेष्वपि यानि हि सदैकरूपगतीनि तानि नक्षत्रशब्देन ज्ञायन्ते, प्रतिदिनं भिन्न-भिन्न गतीनि तु ग्रहशब्देन। तेष्वपि पुनः केचित्मृण्मयकिरणाः, केचित् विषमयकिरणाः केचिदुभयमिश्रकिरणाः केचित् उभयधर्महीन-रश्मयश्चयश्च स्मृताः। एवं विधं नक्षत्रग्रहतारकादिज्योतिः पिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेनाभिधीयते। ज्योतिंषि अस्य सन्ति विवेचनीयत्वेनेति (ज्योतिः शब्दान्मत्वर्थीयेऽचि अर्श आदित्वात् व्युत्पत्या) तदधिकृप्य कृतो ग्रन्थो ज्यौतिषः सूर्यसिद्धान्तादिः। तदधीते तद्वेद वा ज्योतिषिकः ।क्रतूक्थादित्वात् ठक्। ज्यौतिषो वा पक्षे अण्। ज्योतिषमस्यास्तीति ज्योतिषी एवमेव ज्यौतिषी च। केचित् तु ज्योतीषि अधिकृत्य कृतो ग्रन्थः इति व्युत्पत्तिमाश्रित्य शास्त्रमपि ज्यौतिषपदेनाभिदधाति। किन्तु नासौ पक्षः साधुः। यतो हि अणप्रत्ययस्तु ग्रन्थविशेषमादायैव भवति न तु शास्त्रमात्रम्। शास्त्रग्रन्थयोर्भेस्तु स्पष्टमेव। यथोक्तं विषयानुशासनमात्रं शास्त्रमाचार्य विशेषकर्तृको निश्चित् शब्दानुपूर्विको ग्रन्थ इति।

यथ हि पाणिनिः सूत्रकारो न तु व्याकरणकारः, सूत्रस्य ग्रन्थरूपत्वात् व्याकरणस्य तु शास्त्ररूपत्वात्। केचित् ज्योतिविद्यारूपेअर्थे ज्योतिषमिति शब्दं रूढमपि मन्यन्ते। यच्च ज्योतिषशब्दात् रूढात् स्वार्थे अणि ज्यौतिषमिति वदन्ति तदपि निरर्थकशिरोवेदनैव। वस्तुतस्तु शास्त्रमिदं ज्योतिषं ज्योतिर्विषयकम्। न केवलमिदं व्यत्यत्यैवापितु लगधमारभ्य कमलाकर भट्टपर्यन्तं ये खल्वाकरग्रन्थाः प्रणीतास्तत्र शास्त्रमिदं ज्योतिषशब्देनैव व्यवहृतं दृश्यते इति तज्ज्ञा वदन्ति।

शास्त्रमिदं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तमिति त्रिस्कन्ध ज्योतिषशब्देन ज्ञापयति।

इत्थं हि कालचक्र-ग्रहण-ऋतु-संवत्सर खगोलादिविषया वेदेषु यथावसरं प्रतिपादिताः एवं वेदेषु ज्योतिषशास्त्रस्य बहुनिधिरूपेण सिद्धान्तः दरीदृश्यन्यते। अत्रमया स्थालिपुलाक न्यायेन स्फुटरूपेण प्रतिपादितः।

**प्राग्वैदिकवैदिककाले ज्योतिषशास्त्रस्य स्वरूपम्**

प्राग्वैदिककालो हि वेदमन्त्रसङ्ग्रहादपि प्राचीनतरः कालः। न स-ह्यस्माकं ज्ञानविषयः। तदा ज्योतिषशास्त्रस्य तु का वार्ताऽपितु तद्योनेर्वेदस्यैव किं स्वरूपमासीदित्यपि अनुमातुं वयं नैव प्रभवामः। एतावदेव तद्विषये वक्तुं पार्यते यत्तदाऽपि ज्योतिषविषये स्वल्पमपि ज्ञानमवश्यमेवाऽऽसीद्यस्य यथायथं वा विकसितं रूपं वेदमन्त्रेषु दृश्यते। 'अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरुत' 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवींचान्तरिक्षमथो स्वः' 'इति शुश्रूम धीराणां ये नस्तद्व्यचचक्षिरे' इत्यादिकथनैरेतत्सिध्यति। सम्प्रत्यपि ग्रामीणजना दिगवबोधाय ध्रुवादिनक्षत्राणां समयज्ञानाय रात्रौ कृत्तिकानां साहाय्यं गृह्णन्ति। दिवा तु ते सूर्यगतिमधीत्य समयज्ञानं कुर्वन्ति। सुदिने सम्भवत्येतदज्ञातयुगस्यैवावशिष्टम्। ऋग्वेदे 'देवानां पूर्वे युगेऽसतः सदजायत। देवानां युगे प्रथमेऽसतः सदजायत' इति यत्कथितं यच्च यः पश्या- दुत्तरे युगे' इत्यप्युक्तं तस्यायमेवाशयो भवितुमर्हति यद्वैदिकसंहितापूर्ववर्ति- कालेऽपि काचन विशिष्टा सभ्यताऽऽसीदिति।वेदा; नित्या;,वैदिक सभ्यतापि नित्या एव अनुमन्यन्ते।

वेदा;नैव निश्चयेनज्योतिषशास्त्रमुद्दिश्य प्रवृत्ता;.।तत्र गगनमंडलं सूर्याचन्द्रमसौ इत्यादय;मन्त्रा;निष्कर्षमेतत् यच्छास्त्रमिदमं प्रथमंब्रह्मणायज्ञपेरवर्तनाय सृष्टम्।तच्चशिष्यपरम्परा बुधैर्गृहितम्। ।वयं जानीम;वेदानां श्रुतिपरम्परा।ते च विनिर्माय नारदाय प्रोवाच। नारदश्च शास्त्रस्यास्य महत्त्वमङ्गीकृत्य लोके प्रवर्तयामासेदम्। मतान्तरानुसारेणेदं शास्त्रं प्रथमं सूर्येण मयासुराय प्रोक्तम्। ततश्च जगति प्रवर्तितमिति।

कश्यपसंहितानुसारेण ज्योतिःशास्त्रप्रवर्तका अष्टादश आचार्याः ते च यथा-

**'सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।**
**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।**
**रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**
**शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्तकाः।।' इति।**

**पराशरस्तु तानित्थं गणयति-**

**'विश्वसृङ् नारदो व्यासो वसिष्ठोऽत्रिः पराशरः।**
**लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः।।**
**पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः।**
**गर्गो मरीचिरित्येते ज्ञेया ज्योतिः प्रवर्तकाः।।' इति।**

**नारदस्त्वथ तानित्थंमाह-**

**'ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ।**
**मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः।।**
**च्यवनो यवनो गर्गः कश्यपश्च पराशरः।**
**अष्टादशैते गम्भीराः ज्योतिःशास्त्रप्रवर्तकाः।।' इति।**

**इदश्चाग्रे कथितम् –**

**'यज्ञाध्ययन सङ्क्रान्तिग्रहषोडशकर्मणाम्**
**प्रयोजनंच विज्ञेयं तत्तत्कालविनिर्णयात्।।**


© 2026 डॉ ज्योत्स्ना द्विवेदी. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

**विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्ध्यति।**
**तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा।।**
**तं विलोक्याथ तत्सूनुर्नारदो मुनिसत्तमः।**
**उक्त्वा स्कन्धद्वयं पूर्वं संहितास्कन्धमुत्तमम्।।**
**वक्ष्ये शुभाशुभफलज्ञप्तये देहधारिणाम्।**
**होरा स्कन्धस्य शास्त्रस्य व्यवहारप्रसिद्धये।।'**

तदित्थं हि ब्रह्मणा प्रवर्तितं शास्त्रं हि ब्रह्मा नारदाय सोमः शौनकाय नारायणो वसिष्ठाय रामेशाय च वसिष्ठो माण्डव्यवामदेवाभ्यां व्यासः स्वशिष्याय सूर्यो मयाय पुलस्त्याचार्यगर्गात्रिरोमकाः स्वस्वशिष्येभ्यः पराशरो मैत्रेयाय च प्रोक्तवन्त इति। बृहत्संहितायामुक्तम्-मुनिविरचितमिदं यच्चिरन्तनंसाधु नमनुजग्रथितं,तुल्ये अर्थे अक्षरभेदात् अमन्त्रके का विशेषोक्ति। निष्कर्षमेतत् यच्छास्त्रमिदमं प्रथमंब्रह्मणायज्ञप्रवर्तनायसृष्टम्।तच्चशिष्यपरम्परा बुधैर्गृहितम्।तदेव आर्यभट्टेनप्रकाशितम् वराहमिहिरेण विवेचितंच।वेदा हि नैव निश्चयेन ज्योतिषशास्त्रमात्रमुद्दिश्य प्रवृत्ताः। तेन तत्र नैतादृशः प्रसङ्गो येन ज्योतिषशास्त्रं व्याख्यातं स्यात्। तथापि इतरविषयप्रसङ्ग-वसाज्ज्योतिषविषयेऽपि यत्किञ्चिदुक्तं तेनैतज्ज्ञायते यत्तदाऽपि शास्त्रेऽस्मिन् मानवीय ज्ञानं समृद्धमासीत्। तत्र तत्र गगनमण्डलं सूर्याचन्द्रमसौ नक्षत्राणि ताराः ऋतून् मासान् दिवसांश्चादाय मनोहारि चमत्कारि वर्णनं समुपलभ्यते। प्रकरणेऽस्मिन् वेदशब्देन कात्यायनप्रतिज्ञा- सूत्रमनुसृत्य तस्य संहिता - ब्राह्मणभागौ गृहीतौ मन्त्रब्राह्मणयोर्वेदनामधेयमित्युक्तेः।

आकाशमधिकृत्य तत्रोक्तं यद्यः स आकाशः स आदित्य एव। एतस्मिन्नु-दिते सर्वमिदमाकाशते। इन्द्र एव स इति। तेन हि आकाशते द्योतते इत्याकाशः। तत्र पृथिव्या उपरिष्टादन्तरिक्षस्य तदुपरिष्टाद् दिवः प्रतिष्ठा वर्णिता। दिवि मेघस्यान्तरिक्षे वायोश्च स्थितिरपि वर्णितो दृश्यते। यथा-

**'नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः1।**
**'नमोस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः2।**
**एवमेव द्यावापृथिवीविषये तत्रोक्तम्-**
**'यदा वै द्यावापृथिवी संज्ञानाथेऽथ वर्षति3।**
**'प्राणोदानौ वै द्यावापृथिवी।4**
**'इमौ वै लोको रेतः सिश्वाविमो ह्येव लोको रेतः सिश्वत इतो वा अयमूर्ध्वं रेतः सिश्वति धूमं साऽमुत्र वृष्टिर्भवति तामसावभुती दृष्टि तदिमा अन्तरेण प्रजायन्ते।5**

**ऋग्वेदेऽप्युक्तम्-**

**'तिस्रो द्यावः सवितुर्देवा उपस्था एका यमस्य भुवने विराषाट्।**
**आणि न रथ्यममृताभितस्थुः।6**
**विराजमधिकृत्य तत्रोक्तम् -**
**'नाभ्या आसीदन्तरिक्षं शीर्षणोः द्योः समवर्तत।**
**पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्।7**
**'चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत।**
**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।8**

**ऐतरेय ब्राह्मणे उक्तम्-**

**योरन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्याम्।' (11/6)**
**एवमेव तत्र तत्र संवत्सरमासर्तुपक्षाहोरात्र सूर्यचन्द्रादिविषयेऽपि सुनिपुणं वर्णितं दृश्यते। तत्र तत्र युगादिविषये च चर्चा लभ्यते। यथा हि-**
**'देवानां पूर्वे युगे सतः सदजायत।' (ऋ० 10/72/2)**
**'तद्नुषे मानुषेमा युगानि।' (ऋ० 1103/4)**
**'विश्वे ये मानुषा युगा यान्ति मर्त्य रिषः।' (ऋ०5/52/4)**
**'पर्जन्या नाहुषा युगा' (ऋ० 5/73/3)**
**'दीर्घतमा मामतेयो जुजुवनि दशमे युगे।' (ऋ० 1/1581/6)**
**'युगे युगे विदध्यम्।' (ऋ० 6/8/5)**
**'या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।' (ऋ० 19/971)**
**'मानुषा युगाः ।' (वा० 12/111)**

मन्त्रभागेष्वेतेषु युगशब्दः कालविशेषवाचकत्वेन प्रयुक्तो दृश्यते।देवयुग मानुषयुगयोरन्तरमपि तत्र निर्दिष्टं लभ्यते। 'पूर्वे युगे' 'उत्तरे युगे' इत्याकथने युगशब्देन निश्चितकालमान एव निर्दिष्टोऽस्ति। यत्र कुत्र युगशब्द कल्पार्थेऽपि प्रयुक्त इव प्रतिभाति। 'त्रियुगं पुरा' इत्यत्र युगशब्दः सत्य त्रेता- द्वापरावबोधक एव। वैदिकमन्त्रेषु यत्र तत्र युगभेदत्वेन कृतादिशब्दानामपि प्रयोगो दृश्यते। यथा वाजसनेयीयसंहितायाम् -

**'अक्षराजाय कितवं कृतायादिनवदर्श त्रेताय कल्पिनं द्वापरायाधि कल्पिनं।' (30/18)**
**एवमेव तैत्तिरीयसंहितायां युगमानत्वेन कृतत्रेताद्वापरशब्दानां प्रयोग दृश्यते। (4/3/3)**

**तैत्तिरीयब्राह्मणेऽप्युक्तम्-**

**'कृताय सभाविनं त्रेताया आदिनवदशं द्वापराय बहिः सदं फलये सभास्थाणुम्।' (3/4/1)**
**तथैव ऐतरेयब्राह्मणेऽपि यथा-**
**'कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।**
**उत्तिष्ठस्त्रेता भवति कृतं सम्पद्यते चरन्।**
**चरैवेति चरैवेति।' (33/15)**

**पुनश्च तैत्तिरीय ब्राह्मणे-**

**'ये वै चत्वारः स्तोमाः कृतं तत्। अथ ये पञ्च कलिः सः। तस्माच्च तुष्टोमः9।'**

ऋग्वेदादी युगावयवत्वेन संवत्सरादयोऽप्युल्लिखिताः। यथोक्तं वेदाङ्ग ज्योतिषे पाञ्चसंवत्सरं युगमिति तस्य बीजं वेदेषु दृश्यते। यथा हि-

**'संवत्सरस्य तदहः परिष्ठ यन्मण्डूकाः प्रावृषीणं बभूव। ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्।10**
**इत्थं हि यजुर्वेदे पंचानां तैत्तिरीये षण्णामन्यत्रचतुर्णामेवनामोल्लेखोदृश्यते।कालवाचकत्वेनवर्षशब्दः शतपथब्राह्मणादौ प्रयुक्तो दृश्यते।गोपथब्राह्मणे**


© 2026 डॉ ज्योत्स्ना द्विवेदी. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

**11 वर्षार्थे हायन शब्दः,शुक्लयजुर्वेदे सम शब्दःसमुपलभ्यते। 'जिजीविषेत् शतं समाः' 12,..;.लोके शतं समाः' 13।एवमेव ऋतुविषयेपि वैदिकसाहित्ये**

**बहूक्तमस्ति।तैत्तिरीयसंहितायां उक्तमस्तियत्- 'संवत्सरेषड्ऋतवोभवन्ति,द्वादशमासाश्च।'षड्रात्रिदीक्षितास्यात्षड् ऋतवः.....(5/6/7) ।वेदे द्वादशमासाश्च परिगणिता दृश्यन्ते, ;मधुश्च माधवश्च शुक्रश्च शुचिश्च....'तथा च मधुश्च माधवश्च वासन्तिकावृतु....;14 । वेदे अयनविषयेपि बहवःमन्त्राः दृष्टिगोचरचराः भवन्ति 'अपामिदं अयनं समुद्रस्य निवेशनम्'(ऋ.10/142/7)15। एवमेव ग्रहविषयिकी चर्चा अथ च नक्षत्रविषये अपि प्रमाणानि विद्यन्ते।इत्थं हि वेदानां संहिताभागे ब्राह्मणभागे च बहुविधा हि ज्योतिषविषयाःप्रसंङानुसारेणप्रतिपादिता दृश्यन्ते।**

**संदर्भः-**


1. यजुर्वेद. 16/64.
2. यजुर्वेद. 16/65.
3. शतपथ ब्राह्मण. 1/8/3/12.
4. शतपथ ब्राह्मण. 14/2/2/36.
5. शतपथ ब्राह्मण. 7/4/2/22.
6. ऋग्वेद. 1/35/6.
7. ऋग्वेद. 10/90/14.
8. ऋग्वेद. 10/90/13.
9. तैत्तिरीय ब्राह्मण. 1/5/11.
10. ऋग्वेद. 7/10/3/7.
11. गोपथ ब्राह्मण. 6/17.
12. यजुर्वेद (ईशावास्योपनिषद्). 2.
13. यजुर्वेद. 19/46.
14. यजुर्वेद. 14/4.
15. ऋग्वेद. 10/142/8.

**सन्दर्भ ग्रन्थानां सूची (Vancouver Style)**

16. सूर्यसिद्धान्तः (आर्ष संस्करण). वाराणसी: चौखम्बा विद्याभवन।
17. ऋग्वेद भाष्य. अजमेर: परोपकारिणी सभा।
18. अथर्ववेद (भाष्य). नई दिल्ली: आर्ष साहित्य प्रचार ट्रस्ट।
19. यजुर्वेद (भाष्य). पारडी: विश्वेश्वरानन्द शोध संस्थान।
20. लगधाचार्य. आर्ष–ज्योतिष (वेदाङ्ग ज्योतिष)।
21. प्रत्यगात्मानन्द स्वामी. वेदों में विज्ञान. नई दिल्ली: राजहंस प्रकाशन।



**Creative Commons (CC) License**

This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–NonCommercial–NoDerivatives 4.0 International (CC BY-NC-ND 4.0) license. This license permits sharing and redistribution of the article in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and source. No modifications, adaptations, or derivative works are permitted under this license.


**About the corresponding author**




**डॉ. ज्योत्स्ना द्विवेदी** सा संस्कृतविषयस्य सहायकप्राध्यापिका अस्ति। सा उच्चशिक्षा उत्कर्षसंस्थाने, शासकीय ठाकुर रणमत्सिंह महाविद्यालये, रीवा, मध्यप्रदेशे भारतदेशे कार्यं कुर्वन्ति। संस्कृतसाहित्ये, वैदिकअध्ययने च तस्याः विशेषरुचिः अस्ति। सा शैक्षणिकानुसन्धानसत्रे च सक्रियतया संलग्ना अस्ति।




© 2026 डॉ ज्योत्स्ना द्विवेदी. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/